# APPENDIX-I

## Good Sayings in the works of the poet

**1.** धर्मानपेक्षे नवराजतन्त्रे

क्लिश्यन्ति सम्भावित-धर्मपक्षाः।

अधार्मिका वञ्चनलुण्ठनार्थाः

निर्वाधमत्राद्य चरन्ति धूर्ताः।।१.४०।।(**BB**)

**2.** जनोऽधिरूढो दिवि चन्द्रलोक-

मिमे च चन्द्रग्रहणाभिभूताः।।

युगे प्रयाते वियतोऽपि पारं

मूढा धरिण्यां कुणपान् वहन्ति।।५.२०।।(**BB**)

**3.** आचारहीनैः शुचितानभिज्ञैः

गुण-प्रभावोदय –बोध-शून्यैः।

जडैरकाले परितुद्यमाना-

स्त्वामेव दिव्यौषधयः श्रयन्ते।।८.१०।।(**BB**)

**4.** छायाफलैर्दारुदलैश्च मूलै-

र्जनोपकाराय सदैव सिद्धैः।

निकृन्तनोत्पाटन – भीत्यखिन्नै-

स्त्वं सेव्यसे सद्भिरिवात्र वृक्षैः।।८.११।।(**BB**)

**5.** प्रक्षीयमाणा कलिजोपसर्गैः

सनातनी संस्कृतिरद्य युक्त्या।

संरक्षिता भाविजनोपकृत्यै

तपोवनेऽस्मिन् भवेतेति मन्ये।।८.१३।।(**BB**)

6. योग्यता-पूजिताः श्रेष्ठाः सदाचारयशस्विनः।
अमीषां पुरतो नित्यं दृश्यन्ते नतकन्धराः।। २९.८।। (**BB**)

7. तव कर्णसमान-सूनुतो
भयभीता अभवन् वृकोदराः।
कपटैर्हि तमर्जुनेन हा!
सन्तापं गमिताऽस्मि निघ्नता।। ३७.६।। (**BB**)

8. परमद्य कृतघ्न – सङ्कुले
परितः स्वार्थकथा-परायणे ।
सकलोऽपि निजार्थसाधको
नहि कश्चित्परमार्थमीक्षते।। ३७.११।। (**BB**)

9. न कुलं न सदाचारो न विद्या न च पौरुषम्।
कल्पन्ते नास्य प्रीत्यर्थं वामाचारप्रियोऽस्त्ययम्।। ४.२७।। (**RS**)

10. क्षीणेषु पुण्येषु तथा दिविस्थो निवर्तते मर्त्यपदं विपन्नम्। ५.७६।। (**RS**)

11. वासांसि जीर्णानि च कुञ्चितानि, धृत्वा प्रयान्तं पथि मां हि भद्राः।
अनाप्तपीठं प्रसमीक्ष्य दीनं धक्ष्यन्ति व्यङ्ग्यैर्हृदयं मदीयम्।। ५.८०।। (**RS**)

12. शास्त्रं विनापि विजिता रिपवश्च येन,
पाशं विनापि पशवो गमिता वशित्वम्।
क्रूरा धृतायुधनखाः पृतनोग्रवीर्याः,
वाक्पौरुषेण कलिता शशकाः मृगेन्द्राः।। ७.८।। (**RS**)

13. योऽहिंसया प्रतिहतां विदधेऽरिहिंसां,
सत्येन यस्य विजितं हृदयं रिपूणाम्।
चक्रेण यस्य दलितं दलितस्य दैन्यं,
तस्यानुगा वयमिहोपगता मतार्थम्।। ७.९।। (**RS**)

**14.** अस्यामुत्पादितो विद्वान् व्यासेन सदृशः सुतः।
दूरीकृतो महानेष वर्णभेदो भयङ्करः।। ९.४२।।(**RS**)

**15.** हिंसया रक्ष्यते राज्यमसत्येन च सत्यता।
स्तेयेन पाल्यते धर्मो ब्रह्मचर्यं निरोधकैः।। १०.४२।।(**RS**)

**16.** त्वदीयेनोपनेत्रेण छिद्रं पश्यन्ति मन्त्रिणः।
लगुडेन च खल्वाटास्ताड्यन्ते न्यायकोविदाः।। १०.४३।।(**RS**)

**17.** स्वार्थाय विहिता तुष्टिस्तुरुष्काणां दुरात्मनाम्।
यदुप्तं विषबीजं वै जगाम विषवृक्षताम्।। १०.५३।।(**RS**)

**18.** येषां न राष्ट्र-हितसाधनधर्म-बोधो,
येषां न पूर्वजकथागुणगानगर्वः।
येषां न मित्ररिपुभेदविवेकलेशः,
धिक् ते जनाः कुटिलकल्मषपापकीटाः।। १०.६६।।(**RS**)

**19.** कुर्वन् भवानपि शठे शठतां स्वकीयं
कूटाख्ययेव लभतां मतदानपुण्यम्।
नो साधुता कलियुगे फलतीति सम्यग्
जानन्ति शास्त्र-निपुणाः विबुधा भवन्तः।। १४.७७।।(**RS**)

**20.** जातं हि सम्प्रति कलौ जडजल्पितं हा।। १८.३५।।(**RS**)

**21.** उपकारं न पश्यन्ति कृतघ्नाः पापिनो जनाः।
निग्रहान्मोचितो दुष्टस्तमेव निजघान सः।। १८.४४।।(**RS**)

**22.** अर्थकामान्धतां प्राप्ताः संघशक्तिविवर्जिताः।
परस्परं विनिघ्नन्तो नक्ष्यन्ति यादवा इव।। १८.५५।।(**RS**)

**23.** चित्ते च नोच्छलति मानदबिन्दुमोहः
धिक् ते शिला इव जना विगतात्मगर्वाः।। १.११।।(**SS**)

**24.** ये ग्राव – मात्रमतिका ननु देवमूर्तौ

पानीय-भावधिषणा शुचिगांगनीरे।

येषाञ्च यज्ञविभवाः पशवो हि गावः

तेषां कुतो भवतु भारतभूमिगर्वः॥ १.१२॥ (**SS**)

**25.** श्वार्थोपलब्धि-सुहृदः कृतकात्मनीनाः,

आश्लिष्य ये च गमिता निजसोदरत्वम्।

भित्वा सहोदरपणं सहसा त एव,

राष्ट्रं विभज्य यवनाः प्रययुः स्वपक्षम्॥ १.१३॥ (**SS**)

**26.** जातेऽपि बन्ध्यफलिते रिपुसख्यबन्धे

नाद्याति तस्य गलितः शशशृंग-मोहः॥ १.१५॥ (**SS**)

**27.** विज्ञान -कोषा विमल-प्रबोधा

विश्वान्धकारास्तमने समर्थाः।

वेदा विषण्णाः सदने स्वकीये

खिद्यन्त्यहो कालकषाभिषङ्गे॥ १.२९॥ (**SS**)

**28.** तेषां दुर्मति-भाविता जडधियो लुप्तात्मबोधाश्चिरं

जाता वेद-पुराण-शास्त्रविषये भ्रान्ताः परैर्वञ्चिताः।

मिथ्या-बोध-विजृम्भणेन सततं स्वीयं तु हा विस्मृतम्

उच्छिष्टाशनपूरितोदरदरीमूढा विदो नोंऽमृतम्॥ १.३४॥ (**SS**)

**29.** स्वार्थाय कौटिल्यजुषां शठानां,

धर्मद्विषां वाचि धृतव्रतानाम्।

सत्यं छलेन क्षुरतां जनानां,

कृत्यं विलोक्यातिशयं चिखेदुः॥ ५.४॥ (**SS**)

**30.** धिक् ते जनाः स्वार्थरता मदान्धाः,

राष्ट्रस्मिता-बोध-विशून्यचिताः।

दास्य-प्रभावाद् विकृतात्मसंज्ञाः,

धर्मानपेक्षा-रटने विमूढाः।। ११.२७।।(SS)

**31.** धिक् सा मतिर्विगत-राष्ट्र-गुरुत्व-भावा

धिक् सा स्तुतिः पर-जनोदय-गीत-गर्भा।

धिक् सा स्मृतिः स्मरति या नहि राष्ट्रधर्मं,

धिक् सा भृतिर्वहति या नहि राष्ट्र-भक्तिम्।। ११.२८।।(SS)

**32.** नो माता परितापितापि विषमे भूयात् कुमाता परम्।।५३।।(KK)

**33.** कामार्थाहतजीवना हि मनुजा धर्मानपेक्षोन्मुखाः।।८९।।(KK)

**34.** तारुण्यं यदुपास्यते चलतमं नैतच्चिरं स्थास्यति।।१०४।।(KK)

**35.** नोपेक्ष्यास्तरुणैः सदैव विषमे ज्ञानाय वृद्धाः जनाः।। १०५।।(KK)

**36.** दैवोपलब्धे सहसाऽतिवित्ते, भोगाभिलाषोऽपि जगाम वृद्धिम्।।८०।।(PY)

**37.** अवाप्य वित्तं सहसा दरिद्रः सञ्जायते दर्पविलुप्तबोधः।।८१।।(PY)

**38.** जाता अजाः पञ्चनखा युगेऽस्मिन्।।८३।।(PY)

**39.** मेने स्वसेनायुधदर्पमत्तो दशाननं वै परिखाधिनाथम्।।८४।। (PY)

**40.** यया त्रिलोकी परिपाल्यते निजैः पीयूषतुल्यैरर्निशं पयोभिः।

शस्यैः प्रशस्यैः कुरुते च शाद्वलां धरामिमां मूत्रपुरीषदानैः।। २१।।(KS)

**41.** धर्मस्य मूलं गणिता हि गावः ता एव मूलं निजसंस्कृतेश्च।

सर्वेऽपि देवा वपुषि प्रतिष्ठा इति श्रुतौ नो भणितं हि तस्याः।। २७।।(KS)

**42.** धन्यास्तु ते गोकुलरक्षणोद्यमाः।।२८।। पृ.२७ (KS)

**43.** सुरसरित्सलिलं शुचि निर्मलं दुरितनाशकमन्तिमजीवने।

सुरभिदानमपीह मतं तथा मृतिमुखं विशतो मनुजस्य वै।। ३८।।(KS)

**44.** ननुधर्मविहीनशासने सा जाता विफलाऽद्य भारते।। ८७।।(KS)

**45.** लावण्यं ललनागतं तु मनसो मानेन वै मीयते।।८।।(**SL**)

**46.** मूढास्ते निगदन्ति दुर्लभतमां प्रीतिं तु ये शाश्वतीं
ते सत्यं परिवञ्चिताः शिशुजनैर्मर्मानभिज्ञैः जडैः।।१४।।(**SL**)

**47.** गाम्भीर्यं न विलोकयन्ति जलधेर्वीचीविलासे रताः।।१४।।(**SL**)

**48.** तुच्छापूर्णतमप्रमुग्धमतिना पूर्णं मयोपेक्षितम्।।८।।(**SL**)

**49.** पूर्णे राजति शाश्वतेऽपि कुधियाऽपूर्णे रतिः कल्पिता।।९।।(**SL**)